सभायाञ्च बुधे जातो मूर्खो भवति पण्डितः ।
धनवान् धार्म्मिकश्चैव चिररोगी भवेत्तु सः ॥७॥
क्रूरः खलो हतमूर्खः पापशीलो भवेन्नरः ।
बुधस्यागमने नित्यं जायते च नराधमः ॥८॥
भोजने च भवेत् सौख्य धनहीनो भवेन्नरः ।
परद्वेषी प्रवासी च शोषगात्रव्यथान्वितः ॥९॥
यो जातो नृत्यलिप्सायां धनवान् पण्डितः कविः ।
उत्साही च महाहृष्टो भुनक्ति सुख-
मद्भुतम् ॥ १० ॥
कौतुके च यदा जातो भवेत् सर्व्वजनप्रियः ।
अर्शोरोगी दद्रुयुक्तो धनवानल्पशस्यकः ॥११॥
निद्रायाञ्च यदा जातः सर्व्वदुःखैकपात्रताम् ।
नानाक्लेशमवाप्नोति रोगशोकयमक्षयम् ॥१२॥”
इति बुधस्य ॥ * ॥

“धनवान् लम्पटः श्यामः स्थूलो व्रणरुजान्वितः ।
जीवस्य शयने जातो मानवो नात्र संशयः ॥१॥
उपवेशे गुरोर्जातो बहुभाषी च रोगवान् ।
पशुघाती महाशिल्पी श्लीपदी रोगसंयुतः ॥२॥
नेत्रपाणौ गुरोर्जातः कासरोगी धनी भवेत् ।
क्षतादिज्वरयी नित्यं जायते नात्र संशयः ॥३॥
गुरोः प्रकाशे धनवान् लिङ्गगुह्ये रुजान्वितः ।
दक्षो लम्पटपापी च श्यामवर्णो रुजान्वितः ॥४॥
सर्पभीतो गूढ़कर्म्मा साहसी गमनोन्मुखे ।
परवित्तेन धनवान् पुमान् भवति वाक्पतौ ॥५॥
गुरोश्च गमनेच्छायां जातो भवति मानवः ।
शूली धनी प्रवासी च सेवाकर्म्मणि तत्परः ॥६॥
वक्ता दाता च धनवान् राजसेवान्वितो नरः ।
शूलरोगी भवेन्नित्यं सभायां वाक्पतौ स्थिते ॥७॥
धार्म्मिकस्तीर्थविख्यानी धनी चागमने गुरोः ।
परदारेषु संलुब्धो जायते नात्र संशयः ॥८॥
भोजने बहुसौख्याढ्यो मांसलुब्धो महासुरः ।
कामुकः प्रियवाक्यश्च जायते नात्र संशयः ॥९॥
नृत्यलिप्से शठो वाग्मी धनवान् सात्विकस्तथा ।
महदैश्वर्य्यसंयुक्तो जीवस्य च भवेन्नरः ॥१०॥
कौतुके च गुरोर्जातो धनवान् धार्म्मिकः सदा ।
नृत्योत्साही महत्सङ्गी भुनक्ति सुखमद्-
भुतम् ॥ ११ ॥
निद्रायाञ्चैव यो जातश्चक्षूरोगी भवेच्च सः ।
कृपणो बहुभाषी च दुःखितो भ्रमते
महीम् ॥ ११ ॥”
इति गुरोः ॥ * ॥

“शुक्रस्य शयने जातो लम्पटो बहुभाषकः ।
दन्तरोगी महाक्रोधी नीचो भवति नित्यशः ॥१॥
उपवेशे तथा जातो बलवान् दाम्भिकः सदा ।
नित्यप्रवासी रोगी च जायते नीचसंस्थिते ॥२॥
नेत्रपाणौ भृगोर्दुःखी रोगशोकसमन्वितः ।
धनहीनो महारोगी मानवः स्यान्न संशयः ॥३॥
भृगोः प्रकाशने जातो विद्याधनसमन्वितः ।
दाता च धार्म्मिकश्चैव कीर्त्तिमान् जायते नरः॥४॥
शुक्रस्य गमने जातः पादमूले रुजान्वितः ।
नित्योत्साही महाशिल्पी भवेत्तीर्थगतौ
रतः ॥ ५ ॥
गमनेच्छौ यदा जातो भ्रातृनाशो भवेद्ध्रुवम् ।
माता च म्रियते तस्य शैशवे व्याधिसंयुतः ॥६॥
सभायाञ्च भृगोर्जातो राजपात्रो महाधनी ।
कुलशीली महादक्षः केवलं शूलरोगवान् ॥७॥
भृगोरागमने जातो दुःखितो बहुलम्पटः ।
दद्रुरोगी पुत्रशोकी जायते च नराधमः ॥८॥
शुक्रस्य भोजने जातो बलवान् दाम्भिकः सदा ।
महाधनी भवेन्नित्यं वाणिज्येन विशेषतः ॥९॥
यो जातो नृत्यलिप्सायां स वाग्मी जायते ध्रुवम् ।
पाण्डित्यं कविता चैव वर्द्धते च दिने दिने ॥
यदि चैव भवेन्नीचे मूर्खो भवति निश्चितम् ।
तुङ्गस्थाने विशेषेण राजपात्रो महाधनी ॥
कामुको बहुकान्तश्च परयोषित्प्रियः सदा ।
श्यामवर्णस्तथा मानी याज्ञिको बहुभा-
षकः ॥१०॥
शुक्रस्य कौतुके जातो धनवान् सात्विकः सदा ।
महाहृष्टो महाबन्धुः कौतुकी च भवेत् सदा ॥
बहुपुत्रकलत्रश्च नानासुखसमन्वितः ।
नीचे तद्विपरीतः स्यात् दुःखशोकसम-
न्वितः ॥ ११ ॥
निद्रायाञ्च भृगोर्जातो भवेद्रोगी स निश्चितम् ।
नित्यक्लेशी महादुःखी जायते नात्र संशयः ॥
जायायाञ्च सुतस्थाने यति निद्रा भृगोर्भवेत् ।
तदा सर्व्वविनाशः स्याद्विष्णुना परिकी-
र्त्तितः ॥१२॥”
इति शुक्रस्य ॥ * ॥

“शयने च शनेर्जातो लम्पटो बहुभाषकः ।
गुह्यस्थाने भवेद्रोगी कोषवृद्धिश्च जायते ॥
लग्नात् सप्ताष्टमे चैव शयनस्थः शनैश्चरः ।
तदा नित्यप्रवासी स्याच्चक्षुक्षयी भवेच्च सः ॥१॥
उपवेशे यदा जातः श्लीपदी दद्रुसंयुतः ।
धनहीनो भवेत्तस्य पीड़ा भवति नित्यशः ॥२॥
नेत्रपाणौ यदा जातो मूर्खो भवति पण्डितः ।
धनवान् धार्म्मिकश्चैव द्विभार्य्यो बहुभाषकः ॥३॥
प्रकाशने च यो जातो राजपात्रो भवेच्च सः ।
नानागुणेन गुणवान् धार्म्मिकः पण्डितः शुचिः॥”
मतान्तरे ।
जायास्थाने च लग्ने च प्रकाशने यदा शनिः ।
तदा सर्व्वविनाशः स्याज्ज्ञातिध्वंसो भवेद्
ध्रुवम् ॥ ४ ॥
गमने च यदा जातः पादमूले रुजान्वितः ।
तीर्थे च गतिमान्नित्यं पुत्रदारैर्विवर्ज्जितः ॥५॥
यो जातो गमनेच्छायां श्लीपदी रोगसंयुतः ।
दन्ताघाती महाक्रोधी कृपणः परनिन्दकः ॥६॥
सभायाञ्च शनेर्जातः पुत्रदारधनैर्युतः ।
सर्व्वत्र लभते वित्तं नानारत्नसमन्वितम् ॥७॥
आगमने यदा जातो महाक्रोधी रुजान्वितः ।
सर्पादिभिश्च संदष्टो भ्रातृनाशी भवेद्ध्रुवम् ॥८॥
भोजने चैव यो जातो मन्दाग्निश्च महानपि ।
अर्शोरोगी तथा शूली चक्षूरोगी भवेच्च सः ॥९॥
यो जातो नृत्यलिप्सायां नर्त्तको बहुभाषकः ।
जीवतो दुःखितश्चैव प्रवासी परसेवकः ॥१०॥
कौतुके च शनेर्जातो राजपुत्रो महाशयः ।
दाता भोक्ता महादक्षो धार्म्मिकः पण्डितः
शुचिः ॥ ११ ॥
निद्रायाञ्च शनेर्जातो धनवान् पण्डितः शुचिः ।
चक्षूरोगी पित्तशूली द्विभार्य्या बहुपुत्रकः ॥
विशेषतश्च धर्म्मस्थे कर्म्मस्थे च कदाचन ।
यदि दैवाद्भवेन्निद्रा नाशो भवति निश्चितम् ॥
कर्म्मनाशो धर्म्मनाशः क्षुधार्त्तो दुःखितः सदा ।
नित्यप्रवासी रोगी च कार्य्यनाशः पदे पदे ॥
स्वमित्रगेहे षष्ठे वा केन्द्रे वा स्वगृहे पुनः ।
तदा सर्व्वं विचार्य्यञ्च वैपरीत्येन चिन्तनम् ॥
जायायाञ्च सुतस्थाने यदि निद्रा भवेत् पुनः ।
तदा सर्व्वं शुभं विद्याद्विष्णुना परि-
कीर्त्तितम् ॥ १२ ॥
इति शनेः ॥*॥

शयने च यदा राहोर्जन्म यस्य भवेत् पुनः ।
तस्य क्लेशो महादुःखं जायते च न संशयः॥१॥
उपवेशे च यो जातः श्लीपदी रोगसंयुतः ।
बहुहानिर्नरेन्द्रस्य पीड़ा भवति नित्यशः ॥२॥
नेत्रपाणौ यदा जातश्चक्षूरोगी भवेद्ध्रुवम् ।
सर्पाघाती महाभीतिर्द्विभार्य्यो बहुभाषकः ॥३॥
प्रकाशने च यो जातो धनवान् धार्म्मिकः पुनः ।
नित्यप्रवासी चोत्साही सात्त्विको धार्म्मिकः
शुचिः ॥ ४ ॥
गमने चैव यो जातो नानारोगैर्धनक्षयः ।
दन्ताघाती महाक्रोधी पिशुनः परनिन्दकः ॥५॥
यो जातो गमनेच्छायां बहुपुत्रो महाधनः ।
पण्डितो गुणवान् दाता जायते च नरोत्तमः॥६॥
सभायाञ्च यदा जातः कृपणो धनसंयुतः ।
नानागुणेन गुणवान् धार्म्मिकः पण्डितः
शुचिः ॥ ७ ॥
आगमने च यो जातो लम्पटो बहुभाषकः ।
सुहृद्बन्धुविनाशः स्यान्नानाक्लेशश्च जायते ॥८॥
भोजने च महादुष्टो मन्दाग्निश्च रुजान्वितः ।
कृपणः कलहाढ्यश्च दुःखितो नित्यसेवकः ॥९॥
यो जातो नृत्यलिप्सायां खञ्जो भवति नान्यथा ।
पुत्रनाशो भवेत्तस्य जायानाशो भवेद्ध्रुवम्॥१०॥
कौतुके च यदा जातो गुणैः सर्व्वैः समन्वितः ।
नानाधनेन धनवान् राजसेवासु तत्परः ॥
यदि दैवाद्भवेत्तुङ्गी स्वगृही वा कदाचन ।
तदा सर्व्वं वैपरीत्यं जायते च न संशयः ॥११॥
यो जातो राहुनिद्रायां दुःखितः सर्व्वतस्तथा ।
नानास्थाने गतो वापि धनपुत्रविवर्ज्जितः ॥
जायायाञ्च सुतस्थाने यदि निद्रां विधुन्तुदः ।
तदा सर्व्वं वैपरीत्यं शतजायासमन्वितः ॥१२॥
नानाशास्त्रं समालोक्य क्रियते ग्रन्थसंग्रहः ।
बलाबलविचारेण युक्त्या सञ्चिन्तयेद्बुधः ॥”
इति ग्रहाणां शयनादिद्वादशभावविवेकः
समाप्तः ॥ इति जातरत्नः कोष्ठीप्रदीपश्च ॥
अथ तन्वादिद्वादशभावाः ।
ते च नराणां जन्मलग्नावधिकद्वादशस्थानानि ।
यथा,—